पुना International School

Shree Swaminarayan Gurukul, Zundal

| SUMMATIVE ASSIGNMENT -3 | |
|---|---|
| GRADE-**VII** | SUBJECT – SANSKRIT |
| SYLLABUS – LESSON-9-10 | |

## अपठित-अवबोधनम

## प्र-1 अधोदतं प्रत्येकं अनुच्छेदं पठित्वा प्रश्नान उत्तरत लिखत-

कस्मिंश्चिद् राज्ये कोऽपि नृपः शासनं करोति स्म। एकः स्वामिभक्तः वानरः तस्य अङ्गरक्षकः आसीत्। वानरः मूर्खः। आसीत्। एकदा सुप्तस्य नृपस्य वानरः व्यजनं करोति स्म। एका मक्षिका तस्य ग्रीवायाम् अतिष्ठत्। वानरः मक्षिकाम् अपसारियतुं खड्गेन प्रारम् अकरोत्। मक्षिका तु उड्डीयते स्म परन्तु खड्ग-प्रहारेण नृपस्य ग्रीवा अच्छिनत्।

कस्य रक्षणे अस्माकं रक्षणं भविष्यति

प्रश्न 1.उपर्युक्त गद्यांशस्य उचितं शीर्षकं लिखत? (उपर्युक्त गद्यांश का उचित शीर्षक लिखिए?)
उत्तर:मूर्खः वानरः (मूर्ख बन्दर)।

प्रश्न 2,वानरः कस्य अङ्गरक्षकः आसीत्? (बन्दर किसका अंगरक्षक था।)
उत्तर:नृपस्य (राजा का)

प्रश्न 3.मक्षिकान् अपसारयितुं वानरः केन प्रहारम् अकरोत्? (मक्खी को उड़ाने के लिए बन्दर ने किससे प्रहार किया?)
उत्तर:खड्गेन (तलवार से)।

प्रश्न 4.सुप्तस्य नृपस्य व्यजनं कः करोति स्म? (सोते हुए राजा की हवा कौन कर रहा था?)
उत्तर:वानरः (बन्दर)।

प्रश्न 5.मूर्खः कः आसीत्? (मूर्ख कौन था?)
उत्तर:वानरः (बन्दर)।

नगरस्य पूर्वभागे एकम् उद्यानम् अस्ति। उद्याने विविधाः वृक्षाः, पादपाः, लताः च सन्ति। वृक्षाः मधुराणि फलानि यच्छन्ति। इमे आम्रवृक्षाः सन्ति। आम्रवृक्षे पिकः तिष्ठति। पिकः मधुरं गायति। पादपेषु लतासु च पुष्पाणि विकसन्ति। पुष्पेषु सुगन्धिः भवति। अतः पुष्पेषु भ्रमराः तिष्ठन्ति, पुष्पाणां रसं पिबन्ति, मधुरेण स्वरेण च गुञ्जन्ति।

प्रश्न 1.
उपर्युक्त गद्यांशस्य उचितं शीर्षकं लिखत? (उपर्युक्त गद्यांश का उचित शीर्षक लिखिये।)
उत्तरः
उद्यानम् (बाग)।

प्रश्न 2.
नगरस्यपूर्व भागे किम् अस्ति? (नगर के पूर्वभाग में क्या हैं?)
उत्तरः
उद्यानम् (बाग)।

प्रश्न 3.
सुगन्धिः केषु भवति? (सुगन्ध किनमें होती है?)
उत्तरः
पुष्पेषु (फूलों में)।

प्रश्न 4.
पिकः कुत्र तिष्ठति? (कोयल कहाँ बैठती है?)
उत्तरः
आम्रवृक्षे (आम के पेड़ पर)।

प्रश्न 5.
पुष्पेषु के तिष्ठन्ति? (फूलों पर कौन बैठते हैं?)
उत्तरः
अमराः (भैरे)।

## 2

अहम् एक: छिन्न: द्रुम: अस्मि। ह्य: वने एक: नर: आगच्छत्। स: काष्ठाय मम शरीरम् अच्छिनत्। छेदनेन मे शरीरे अनेके व्रणा: जाता:। छुरिकाया: प्रहारेण शरीरात् अश्रुरूपा: जलबिन्दव: अपतन्। अकथनीया मम पीडा। हृदयं विदीर्णं जातम्। अश्रुभि: कण्ठ: अवरुद्ध:। मम अन्तकाल: समीपे एव तिष्ठति। काष्ठानि एकत्रीकृत्य स: तु अगच्छत्। परं कोऽस्ति अत्र व्यथाकथाश्रवणाय? वृक्षान् छित्त्वा नर: प्रकृतिमातु: अङ्गानि नाशयति। इन्धनाय, कर्गदपत्राय, भवननिर्माणाय मम काष्ठस्य प्रयोग: भवति। किन्तु कुत: मे पत्राणि, पुष्पाणि कुत: च रोगनिवारणाय औषधय:? निराश्रिता: भविष्यन्ति आश्रिता: खगा: कीटपतङ्गाश्च। पन्थान: अपि छायाहीना: भविष्यन्ति। आतपेन तप्त: श्रान्त: पथिक: अधुना कुत्र गमिष्यति? मम जीवने पुन: वसन्तर्तु: न आगमिष्यति।

**उपरिदत्तां छिन्नवृक्षस्य आत्मकथां पठित्वा अधोलिखितान् प्रश्नान् उत्तरत–**

1. छुरिकाप्रहारेण वृक्षस्य शरीरात् के अपतन्? (एकपदेन लिखत)
2. वृक्षस्य काष्ठप्रयोग: कुत्र-कुत्र भवति? (पूर्णवाक्येन उत्तरं लिखत)
3. यथोचितपदेन रिक्तस्थानं पूरयत–
   परं कोऽस्ति अत्र.................?
4. कुत: रोगनिवारणाय औषधय:? अत्र अव्ययपदं किम्?
5. आतपेन **तप्त: पथिक:** कुत्र गमिष्यति? अस्मिन् वाक्ये स्थूल-पदयो: किं विशेषणपदम्?
6. 'अकथनीया मम पीडा' अत्र 'मम' सर्वनामपदं कस्मै प्रयुक्तम्?
7. **'आश्रिता:'** अस्य पदस्य विपरीतार्थकं पदं लिखत।
8. अस्य गद्यांशस्य समुचितं शीर्षकं लिखत।

**उत्तराणि–**

1. जलबिन्दव:
2. इन्धनाय, कर्गदपत्राय भवननिर्माणाय च वृक्षस्य काष्ठस्य प्रयोग: भवति।
3. व्यथाकथाश्रवणाय
4. कुत:
5. तप्त:
6. छिन्नाय वृक्षाय
7. निराश्रिता:
8. छिन्नस्य वृक्षस्य आत्मकथा।

**प्र-2 मञ्जूषातः समानार्थकपदानि चित्वा लिखत-**

[ परस्य ,दुःखम्, आत्मानम्, बाधितः, परिवारः, सम्पन्नम्, त्यक्त्वा, सम्पूर्णे ]

- स्वकीयम् – आत्मानम्
- अवरुद्धः – बाधितः
- कुटुम्बकम् – परिवारः
- अन्यस्य – परस्य
- अपहाय – त्यक्त्वा
- समृद्धम् – सम्पन्नम्
- कष्टम् – दुःखम्
- निखिले – सम्पूर्णे

**प्र-3 रेखांकितपदमाधृत्य प्रश्ननिर्माणं कुरुत–**

(क) मालिनी द्वारमुद्घाटयति?

**उत्तर-** का द्वारमुद्घाटयति?

(ख) शिक्षा सर्वेषां बालानां मौलिकः अधिकारः।

**उत्तर-** शिक्षा केषां मौलिकः अधिकारः?

(ग) दर्शना आश्चर्येण मालिनीं पश्यति।

उत्तर- दर्शना आश्चर्येण कां पश्यति?

(घ) दर्शना तस्याः पुत्री च मिलित्वा परिवारस्य भरणपोषणं कुरुतः स्म।

**उत्तर-** दर्शना तस्याः पुत्री च मिलित्वा कस्य भरणपोषणं कुरुतः स्म?

**प्र-4 अधोलिखितपदानां लिङ्गं, विभक्तिं वचनञ्च लिखत-**

| पदानि | लिङ्गम् | विभक्तिः | वचनम् |
|---|---|---|---|
| बन्धुः | पुँल्लिङ्गम् | प्रथमा | एकवचनम् |

| | | | |
|---|---|---|---|
| देशान् | पुँल्लिङ्गम् | द्वितीया | बहुवचनम् |
| घृणायाः | ------------ | पञ्चमी | एकवचनम् |
| कुटुम्बकम् | ------------ | द्वितीया | एकवचनम् |

## प्र–5 सन्धि विच्छेदं पूरयत–

| | | | | |
|---|---|---|---|---|
| (क) ग्रामंप्रति | – | ग्रामम् | + | प्रति |
| (ख) कार्यार्थम् | – | कार्य | + | अर्थम् |
| (ग)करिष्यत्येषा | – | करिष्यति | + | एषा |
| (घ)स्वोदरपूर्तिः | – | स्व | + | उदरपूर्तिः |
| (ङ) अप्येवम् | – | अपि | + | एवम् |

## प्र–6 (अ) समानार्थकपदानि मेलयत–

आश्चर्येण - विस्मयेन

उल्लासेन – प्रसन्नतया

परिवारस्य - कुटुम्बस्य

अध्ययनस्य – पठनस्य

कालः – समयः

(आ) विलोमपदानि मेलयत–

क्रेतुम् – विक्रेतुम्

श्वः – ह्यः

ग्रामम् – नगरम्

समीपस्थम् – दूरस्थम्

पृच्छति - कथयति

**प्र–7** विशेषणपदैः सह विशेष्यपदानि योजयत-

| | |
|---|---|
| सर्वेषां | बालकानाम् |
| मौलिकः | अधिकारः |
| एषा | अल्पवयस्का |
| सर्वकारीयं | विद्यालयम् |
| समीपस्थे | विद्यालये |
| सर्वासां | बालिकानाम् |
| निःशुल्कं | गणवेषम् |

## प्र–8-कोष्ठकात् समुचितं पदं चित्वा रिक्तस्थानानि पूरयत-

(क) हरये नमः। (हरिं/हरये)

(ख) ग्रामम् परितः कृषिक्षेत्राणि सन्ति। (ग्रामस्य/ग्रामम्)

(ग) अम्बायै नमः। (अम्बायाः/अम्बायै)

(घ) मञ्चस्य उपरि अभिनेता अभिनयं करोति। (मञ्चस्य/मञ्चम्)

(ङ) पितरम् उभयतः पुत्रौ स्तः। (पितरम्/पितुः)

## प्र-9-एकपदेन उत्तराणि लिखत–

(क) गिरिजायाः गृहसेविकायाः नाम किमासीत दर्शना

(ख) दर्शनायाः पुत्री कति वर्षीया आसीत्? अष्टवर्षीया

(ग) अद्धत्वे शिक्षा अस्माकं कीदृशः अधिकारः?                    मौलिकः

(घ) दर्शनायाः पुत्री कथं नृत्यति?                    करतलवादनसहितम्

प्र-10- पूर्णवाक्येन उत्तरत–

(क (अष्टवर्षदेशीया दर्शनाया :पुत्री किं समर्थाऽसीत्?**उत्तर–**

**उत्तर–**अष्टवर्षदेशीया दर्शनायाः पुत्री एकस्य सम्पूर्णस्य गृहस्य कार्यं कर्तुं समर्थासीत्।

(ख (दर्शना कति गृहाणां कार्य करोति स्म?

**उत्तर–** दर्शना पञ्चानां षण्णां वा गृहाणानां कार्यं करोति स्म।

(ग (मालिनी स्वप्रतिवेशिनीं प्रति किं कथयति?

**उत्तर–** मालिनी स्वप्रतिवेशिनीं प्रति कार्यार्थं कस्याश्चित् महिलासहायिकाया वार्तां कथयति।

(घ (अद्यत्वे छात्रा :विद्यालये किं किं निःशुल्कं प्राप्नुवन्ति?

**उत्तर–** अद्यत्वे छात्रा विद्यालये निःशुल्कं गणवेषम्, पुस्तकानि, पुस्तकस्यूतम्, पादत्राणम्, मध्याह्नभोजनम्, छात्रवृत्तिं च प्राप्नुवन्ति।

-----------------------------------------------------------